## तृतीयः पाठः

# तपोवनम्

**महाकविः भासः संस्कृतसाहित्यस्य प्रसिद्ध नाट्यकारः अस्ति। भासेन विरचिताः त्रयोदशनाट्यग्रन्थाः सन्ति। तेषु ''स्वप्नवासवदत्तम्'' नाम नाटकमतिप्रसिद्धम्। नाटकेऽस्मिन् कवेः नाट्यकलायाः उत्कृष्टता दृश्यते। षडङ्कात्मके नाटकेऽस्मिन् उदयनवासवदत्तायाः कथा निबद्धा।**

**प्रस्तुतोऽयं नाट्यांशः ''स्वप्नवासवदत्तस्य'' प्रथमाङ्कादुद्धृतोऽस्ति। अस्मिन् तात्कालिक तपोवनस्य वर्णनमस्ति। वर्णनमिदं प्राकृतिक सौन्दर्यदृष्ट्याऽपि अद्भुतं निदर्शनीयञ्च।**

**पात्र परिचयः –**

| | | |
|---|---|---|
| सूत्रधारः | – | नाट्यस्य प्रमुखः प्रारम्भकर्ता। |
| भटौ | – | रक्षिणौ |
| यौगन्धरायणः | – | वत्सदेशीयः राज्ञः उदयनस्य महामात्यः (मुख्यमन्त्री) |
| वासवदत्ता | – | उदयनस्य प्रथमपत्नी (गुप्तवेशधारिणी आवन्तिका) |
| काञ्चुकीयः | – | मगधस्यराजप्रासादे अन्तःपुरस्य अधिकारी ब्राह्मणः |
| चेटी | – | दासी |
| तापसी | – | मगधराज्यस्य तपोवनवासिनी तपस्विनी। |
| पद्मावती | – | मगधराज्ञः दर्शकस्य भगिनी (उदयनस्य द्वितीयपत्नी) |
| ब्रह्मचारी | – | लावाणकग्रामवासी छात्रः। |

**( नेपथ्ये )**

**भटौ** – उत्सरतोत्सरतार्याः! उत्सरत।

**सूत्रधारः** – भवतु विज्ञातम्।

**भृत्यैर्मगधराजस्य स्निग्धैः कन्यानुगामिभिः।**
**धृष्टमुत्सार्यते सर्वस्तपोवनगतो जनः॥**

(निष्क्रान्तः)

(प्रविश्य)

**भटौ** – उत्सरतोत्सरतार्याः! उत्सरत।

(ततः प्रविशति परिव्राजकवेशो यौगन्धरायण आवन्तिकावेषधारिणी वासवदत्ता च)

**यौगन्धरायणः** – (कर्णं दत्वा) कथमिहाप्युत्सार्यते? कुतः–

**धीरस्याश्रमसंश्रितस्य वसतस्तुष्टस्य वन्यैः फलै-**
**र्मानार्हस्य जनस्य वल्कलवतस्त्रासः समुत्पाद्यते।**
**उत्सिक्तो विनयादपेतपुरुषो भाग्यैश्चलैर्विस्मितः,**
**कोऽयं भो! निभृतं तपोवनमिदं ग्रामीकरोत्याज्ञया।**

**वासवदत्ता** – आर्य! क एष उत्सारयति?

**यौगन्धरायणः** – भवति! यो धर्मादात्मानमुत्सारयति।

**वासवदत्ता** – आर्य! नह्येवं वक्तुकामा, अहमपि नामोत्सारयित्वा भवामीति।

**यौगन्धरायणः** – भवति! एवमनिर्ज्ञातानि देवतान्यवधूयन्ते।

(ततः प्रविशति काञ्चुकीयः)

**काञ्चुकीयः** – सम्भषक! न खलु न खलूत्सारणा कार्या। पश्य–

**परिहरतु भवान् नृपापवादं,**
**न परुषमाश्रमवासिषु प्रयोज्यम्।**
**नगरपरिभवान् विमोक्तुमेते**
**वनमभिगम्य मनस्विनो वसन्ति॥**

**उभौ** – आर्य! तथा।

(निष्क्रान्तौ)

**काञ्चुकीयः** – भोः! श्रूयताम्?। एषा खलु गुरुभिरभिहितनामधेयस्यास्माकं महाराजदर्शकस्य भगिनी पद्मावती नाम। सैषा नो महाराजमातरं महादेवीमाश्रमस्थामभिगम्यानुज्ञाता तत्रभवत्या राजगृहमेव यास्यति। तदद्यास्मिन्नाश्रमपदे वासोऽभिप्रेतोऽस्याः। तद् भवन्तः–

**तीर्थोदकानि समिधः कुसुमानि दर्भान्**
**स्वैरं धनादुपनयन्तु तपोधनानि।**
**धर्मप्रिया नृपसुता न हि धर्मपीडा-**
**मिच्छेत् तपस्विषु कुलव्रतमेतदस्याः॥**

(ततः प्रविशति पद्मावती सपरिवारा चेटी च।)

**चेटी** – एत्वेतु भर्तृदारिका इदमाश्रमपदं प्रविशतु।

(ततः प्रविशत्युपविष्टा तापसी)

**तापसी** – स्वागतं राजदारिकायाः।

**पद्मावती** – आर्ये! वन्दे।

**तापसी** – चिरंजीव। प्रविश जाते! प्रविश। तपोवनानि नामाऽतिथिजनस्य स्वकं गेहम्।

**पद्मावती** – आर्य! किं दृष्टो मुनिजन आत्मानमनुग्रहीतुम्? अभिप्रेतप्रदानेन तपस्विजन उपनिमन्त्र्यतां तावत् कः किमत्रेच्छतीति?

**काञ्चुकीयः** – यदभिप्रेतं भवत्या। भो भोः आश्रमवासिनस्तपस्विनः।

शृण्वन्तु भवन्तः। इहात्रभवती मगधराजपुत्री अनेन विस्रम्भेणोत्पादितविस्रम्भा धर्मार्थमर्थेनोपनिमन्त्रयते

**कस्यार्थः कलशेन को मृगयते वासो यथानिश्चितं**
**दीक्षां पारितवान् किमिच्छति पुनर्देयं गुरोर्यद् भवेत्।**
**आत्मानुग्रहमिच्छतीह नृपजा धर्माभिरामप्रिया**
**यद् यस्यास्ति समीप्सितं वदतु तत् कस्याद्य किं दीयताम्॥**

**यौगन्धरायणः** – भोः। अहमर्थी।

**पद्मावती** – दिष्ट्या सफलं मे तपोवनाभिगमनम्।

**काञ्चुकीयः** – भो! किं क्रियताम्।

**यौगन्धरायणः** – इयं मे स्वसा। प्रोषितभर्तृकामिमामिच्छाम्यत्र भवत्या कञ्चित् कालं परिपाल्यमानाम्।

**काञ्चुकीयः** – भवती! महती खल्वस्य व्यपाश्रयणा। कथं प्रति जानीमः?

**कुतः** –
**सुखमर्थो भवेत् दातुं सुखं प्राणाः सुखं तपः।**
**सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम्॥**

**पद्मावती** – आर्य! प्रथममुद्घोष्य कः किमिच्छतीत्ययुक्तमिदानीं विचारयितुम्। यदेष भणति तदनुतिष्ठत्वार्यः।

**यौगन्धरायणः** – अनुगृहीतोऽस्मि तत्रभवत्या। वत्से उपसर्पय तत्र भवतीम्।

(ततः प्रविशति ब्रह्मचारी)

**ब्रह्मचारी** – (ऊर्ध्वमवलोक्य) स्थितो मध्याह्नः। दृढमस्मि परिश्रान्तः। अथ कस्मिन् प्रदेशे विश्रमयिष्ये? (परिक्रम्य) भवतु दृष्टम्। अभितस्तपोवनेन भवितव्यम्। तथाहि।

**विश्रब्धं हरिणाश्चरन्त्यचकिता देशागतप्रत्यया**
**वृक्षाः पुष्पफलैः समृद्धविटपाः सर्वे दयारक्षिताः।**
**भूयिष्ठं कपिलानि गोकुलधनान्यक्षेत्रवत्यो दिशो**
**निःसन्दिग्धमिदं तपोवनमयं धूमो हि बह्वाश्रयः।**

यावत् प्रविशामि।

**काञ्चुकीयः** – भोः पूर्वं प्रविष्टा स्मः। प्रतिगृह्यतामतिथिसत्कारः।

**ब्रह्मचारी** – (आचम्य) भवतु भवतु। निवृत्तपरिश्रमोऽस्मि।

**काञ्चुकीयः** – तदागम्यताम्। सम्प्रति हि–

**खगा वासोपेताः सलिलमवगाढो मुनिजनः**
**प्रदीप्तोऽग्निर्भाति प्रविचरति धूमो मुनिवनम्।**
**परिभ्रष्टो दूराद् रविरपि च सङ्क्षिप्तकिरणो**
**रथं व्यावर्त्यासौ प्रविशति शनैरस्तशिखरम्॥**

(निष्क्रान्ताः सर्वे)

## शब्दार्थः

| | | |
|---|---|---|
| उत्सरत | = | दूरं गच्छत (हटो) |
| उत्सिक्तो | = | गर्वितः (अभिमानी) |
| निभृतम् | = | शान्तम् |
| ग्रामी करोति | = | अग्रामं ग्रामं करोति / ग्रामरूपतां सम्पादयति (गाँव जैसा बना रहा है) |
| अनिर्ज्ञातानि | = | अपरिचितानि (अपरिचित) |
| अवधूयन्ते | = | तिरस्कृता क्रियन्ते (तिरस्कृत किए जाते हैं) |
| अभिप्रेतम् | = | अभीष्टम् |
| विस्रम्भा | = | विश्वासा |
| प्रोषितभर्तृकाम् | = | प्रवासोषितपतिकाम्? (प्रोषितः भर्त्ता यस्यास्ताम् 'जिसका पति प्रवासी हो उसको) |
| विश्रब्धम् | = | निःशङ्कम् |
| भूयिष्ठम् | = | प्रचुरम् |
| उपेताः | = | प्राप्ताः (पहुँच गए/गईं) |
| अवगाढ़ः | = | स्नानार्थं प्रविष्टः |
| परिभ्रष्टः | = | पतितः |
| व्यावर्त्य | = | भ्रमणं कारयित्वा (भ्रमण कराकर/घूमाकर) |

## अन्वयः

भृत्यै.....................जनः।

स्निग्धैः कन्यानुगामिभिः मगधराजस्य भृत्यैः तपोवनगतः सर्वः जनः धृष्टम् उत्सार्यते।

धीरस्याश्रम.................ग्रामीकरोत्याज्ञया।

धीरस्य आश्रमसंश्रितस्य वसतः वन्यैः फलैः तुष्टस्य मानार्हस्य वल्कलवतः जनस्य त्रासः समुत्पाद्यते। भोः! उत्सिक्तः विनयात् अपेतपुरुषः चलैः भाग्यैः विस्मितः अयं कः इदं निभृतम् तपोवनम् आज्ञया ग्रामीकरोति।

परिहरतु.................वसन्ति।

भवान् नृपापवादं परिहरतु। आश्रमवासिषु परुषं न प्रयोज्यम्। एते मनस्विनः नगरपरिभवान् विमोक्तुं वनम् अभिगम्य वसन्ति।

तीर्थोदकानि..............मेतदस्याः

तीर्थोदकानि समिधः कुसुमानि दर्भान् तपोधनानि वनात् स्वैरम् उपनयन्तु। हि धर्मप्रिया नृपसुता धर्मपीडां न इच्छेत्। एतत् अस्याः कुलव्रतम्।

कस्यार्थः..............किं दीयताम्

कस्य कलशेन अर्थः? कः यथानिश्चितं वासः मृगयते? दीक्षां पारितवान् (कः) पुनः गुरोः यद् देयं भवेत् किम्

इच्छति? इह धर्माभिरामप्रिया नृपजा आत्मानुग्रहम् इच्छति। यस्य यत् समीप्सितम् अस्ति तद् वदतु। अद्य कस्य किं दीयताम्?

सुखमर्थो..................न्यासस्य रक्षणम्।

अर्थः दातुं सुखं भवेत्। प्राणाः दातुं सुखं भवेत्। तपः सुखं दातुं भवेत्। अन्यत् सर्वं सुखं दातुं भवेत्। (परम्) न्यासस्य रक्षणं दुःखं भवेत्।

विश्रब्धं..............बह्वाश्रयः।

देशागतप्रत्ययाः अचकिताः हरिणाः विश्रब्धं चरन्ति। दयारक्षिताः सर्वे वृक्षाः पुष्पफलैः समृद्धविटपाः। कपिलानि गोकुलधनानि भूयिष्ठम् (सन्ति) दिशः अक्षेत्रवत्यः। हि धूमः बह्वाश्रयः। अतः इदं निःसन्दिग्धं तपोवनम् अस्तीति शेषः।

खगाः वासोपेताः....................शनैरस्तशिखरम्।

खगाः वासोपेताः। मुनिजनः सलिलम् अवगाढः। प्रदीप्तः अग्निः भाति। धूमो मुनिवनं प्रविचरित। दूरात् परिभ्रष्ट असौ रविः अपि संक्षिप्तकिरणः सन् रथं व्यावर्त्य शनैः शनैः अस्तशिखरं प्रविशति।

## अभ्यासः

**1. एकपदेन उत्तरत –**

(क) पद्मावती कस्य भगिनी आसीत्?

(ख) उदयनः कस्य देशस्य नृपः आसीत्?

(ग) यौगन्धरायणः कः आसीत्?

(घ) दुःखं किम्?

(ङ) 'स्वप्नवासवदत्तम्' इत्यस्य नाट्यस्य कः प्रणेता?

**2. एकवाक्येन उत्तरत–**

(क) तपोवनगतो जनः कैः धृष्टमुत्सार्यते?

(ख) मनस्विनो वनमभिगम्य किमर्थं वसन्ति?

(ग) यौगन्धरायणः किं याचितुमिच्छति?

(घ) सुखदायकानि कानि?

(ङ) 'स्वप्नवासवदत्तम्' इत्यस्मिन्नाटके कति अङ्काः सन्ति?

**3. त्रिचतुर्भिर्वाक्यैः उत्तरत –**

(क) पद्मावत्याः कुलव्रतं किम्?

(ख) पद्मावती किं किं दातुमिच्छति?

(ग) 'एवमनिर्ज्ञातानि देवतान्यवधूयन्ते' इत्यस्य किं तात्पर्यम्?

(घ) तपोवनलक्षणानि लिखत।

**4. उचितं योजयत–**

| | (अ) | (ब) |
|---|---|---|
| (क) | खगाः | सलिलमवगाढः |
| (ख) | मुनिजनः | वासोपेताः |
| (ग) | परिहरतु भवान् | वासः |
| (घ) | को मृगयते | दीयताम् |
| (ङ) | कस्याद्य किम् | नृपापवादम् |

**5. रिक्तस्थानानि पूरयत–**

(क) वनमभिगम्य.....................वसन्ति।

(ख) एवमनिर्ज्ञातानि...................।

(ग) दुःखं..................... रक्षणम्।

(घ) संस्कृतसाहित्यस्य आद्यनाट्यकारः.....................मन्यते।

(ङ) महाकविभासेन....................सङ्ख्यकाः नाट्यग्रन्था प्रणीताः।

**6. नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत –**

(क) खलूत्सारणा

(ख) तीर्थोदकानि

(ग) एत्वेतु

(घ) यदेष

(ङ) रविरपि

**7. नामोल्लेखपूर्वकं समास–विग्रहं कुरुत –**

(क) प्रोषितभर्तृकाम्

(ख) कन्यानुगामिभिः

(ग) आश्रमवासिषु

(घ) कुलव्रतम्

(ङ) मगधराजपुत्री

8. **भावविस्तारं कुरुत -**

(क) वनमभिगम्य मनस्विनो वसन्ति।

(ख) यद् यस्यास्ति समीप्सितं वदतु तत् कस्याद्य किं दीयताम् ।

(ग) दु:खं न्यासस्य रक्षणम्।

9. **तपोवनवर्णनं कुरुत।**

10. **अन्वयं कुरुत -**

(क) तीर्थोदकानि................मेतदस्या:।

(ख) कस्यार्थ: ..............किं दीयताम्।

(ग) विश्रब्धं.................बह्वाश्रय:।

(घ) खगा:.....................शिखरम्।

**योग्यताविस्तार: -**

- नाट्यांशस्य मञ्चनं कुरुत।
- अन्यानि अपि भासनाट्यानि पठत।
- श्लोकानां सस्वरगानं कुरुत
- भासनाटकानां सूचीनिर्माणं कुरुत।